- Title – अज्ञात
- Accession No – Title –
- Accession No –
- Folio No/ Pages – 17 | 34
- Lines-
- Size
- Substance Paper –
- Script Devanagari ✓
- Language – संस्कृत
- Period –
- Beginning – पद्यावर्तन्येक पदीतिव श्रातिपंधाः स्कपद्या
- End – किलासासिद्दयेक शतुयाम पार्मा विच्चार्थिका
- Colophon-
- Illustrations -
- Source -
- Subject - आयुर्वेद
- Revisor -
- Author -

1. Remarks- अपूर्ण, पृ० खण्डित

Pallavi

पंचरुथ्यंथ १२
स्पर दूरदीर्घसाहस्पर

पद्यावर्त्तन्येकपदीतिवं ॥ अतिपंथाः सुपंथाश्च सत्पथश्चार्चितेऽध्वनि ॥१६॥ व्यध्वो दुरध्वो विप
थः कदध्वा कापथः समाः ॥ अपंथास्त्वपथं तुल्ये शृंगाटकचतुष्पथे ॥१७॥ प्रांतरं दूरशून्योऽध्वा
कांतारं वर्त्म दुर्गमं ॥ गव्यूतिः स्त्री क्रोशयुगं नल्वः किष्कुचतुःशतं ॥१८॥ घंटापथः संसरणं तत्पु
रस्योपनिष्करं ॥ द्यावापृथिव्यौ रोदस्यौ द्यावाभूमी च रोदसी ॥१९॥ दिवःपृथिव्यौ संज्ञे घुस्माभ्या
ह्वरणाकरः ॥ इति भूमिवर्गः ॥ पूः स्त्री पुरीनगर्यौ वा पत्तनं पुटभेदनं ॥२०॥ स्थानीयं निगमो
न्यत्तु यन्मूलनगरात् पुरं तच्छाखानगरं वेशो वेश्याजनसमाश्रयः ॥२१॥ आपणस्तु निषद्या
यां विपणिः पण्यवीथिका ॥ रथ्या प्रतोली विशिखा स्याच्चयो वप्रमस्त्रियां ॥२२॥ प्राकारो वरणः
सालः प्राचीनं प्रांततो वृतिः ॥ भित्तिः स्त्री कुड्यमेडूकं यदंतर्न्यस्तकीकसं ॥२३॥ गृहं गेहोदवसितं वेश्म
सद्म निकेतनं ॥ निशांतपस्त्यसदनं भवनागारमंदिरं ॥२४॥ गृहाः पुंसि च भूम्न्येव निकाय्य

हस्तचतुःशतेन नल्वः ३ दूरपंचुरासहस्पर
दूरदीर्घसहस्प
नगरनामानि ५
देविपारनामानि २
कोटस्पर
वासनामानि १२
नरकारी गलीनामानि ३
वाडिर
गृहनामानि
भीत्तिर गरस्थिभीतिरडूं २ नर पुस्तीर
रथवहतीतिगलीर

स्यात्साकेतं मयोध्यायां विदेहा मिथिलापुरी महोदयाकन्यकुब्जं कन्याकुब्जमहो
दयं काशीवाराणसी चैव विशाला चोज्जयन्यपि प्राग्ज्योतिष कामरूपं
नरकालयत्त्वपि

पश्चिमउत्तरमिलितदेशस्यैकं २ नामद्वयंम्लेच्छदेशस्य

लोकनामानि भरतखंडस्यैकं नामद्वयंमध्यदेशस्य पूर्वदक्षिणामिलितदेशस्यैकं १

श्वंभुवनंजगत्॥६॥ लोकोऽयंभारतंवर्षंशरावत्यास्तुयोवधिः॥ देशःप्राग्दक्षिणःप्राच्यउदीच्यः
पश्चिमोत्तरः॥७॥ प्रत्यन्तोम्लेच्छदेशःस्यान्मध्यदेशस्तुमध्यमः॥ आर्यावर्तःपुण्यभूमिर्म
ध्यंविंध्यहिमालयोः॥८॥ नीवृज्जनपदोदेशोविषयस्तूपवर्तनं॥ त्रिष्वागोष्ठान्नडप्रायेनड्वान्न
ड्वलइत्यपि॥९॥ कुमुद्वान्कुमुदप्रायेवेतस्वान्बहुवेतसे॥ शाद्वलःशादहरितेसजंबालेतुपंकि
लः॥१०॥ जलप्रायमनूपंस्यात्पुंसिकच्छस्तथाविधः॥ स्त्रीशर्कराशर्करिलःशार्करःशर्करा
वति॥११॥ देशएवादिमावेवमुन्नेयाःसिकतावति॥ देशोनद्यंबुवृष्ट्यंबुसंपन्नव्रीहिपालितः॥१२॥
स्यान्नदीमातृकोदेवमातृकश्चयथाक्रमं॥ सुराज्ञिदेशेराजन्वान्स्यात्ततोन्यत्रराजवान्॥१३॥
गोष्ठंगोस्थानकंतत्तुगौष्ठीनंभूतपूर्वकं॥ पर्यन्तभूःपरिसरःसेतुरालौस्त्रियांपुमान्॥१४॥ वामलू
रश्चनाकुश्चवल्मीकंपुंनपुंसकं॥ अयनंवर्त्ममार्गाध्वपन्थानःपदवीसृतिः॥१५॥ सरणिःपद्धतिः

वल्मीकनामानि

मार्गनामानिद्वेपद्धतिसमे २ पद्धतनामानि

नामद्वयंवर्तनुभाषायैर आर्यावर्तनामा

शाद्वलजलयुक्तदेशस्यनामा तयोः

देशस्थाननामानिस्थानं स्थाननामानि

नामद्वयं आर्यावर्तदेशस्य देशनामानि

शर्करायुक्तदेशस्यपनतदुगही

देशनामानि

देवनामानि २

दे नामानि मदिरा गृहस्य २

परिव्राजक तपस्व्यादि नाम गृहस्य २ ... देवकुलस्य नाम ... अश्वस्थानस्य २ ... बद्धितभूः कुट्टिमः २ ... दे उच्चस्थान नामानि २

... स्थान स्पष्ट ... चारि पटशाला का घर २ ... चतसृणा शाला समाहृता ... मुनिशालानाम कुटी २

निवस्थाः ॥ संस्थाः वासः कुटी द्वयोः शाला सभा संजवनं त्विदं ॥२५॥ चतुःशालं मुनीनां तु पर्णशालोटजो ऽस्त्रियां ॥ चैत्यमायतनं तुल्ये वाजिशाला तु मन्दुरा ॥२६॥ आवेशनं शिल्पिशाला प्रपा पानीयशालिका ॥ मठः छात्रादिनिलयो गञ्जा तु मदिरागृहं ॥२७॥ गर्भागारं वासगृहमरिष्टं सूतिकागृहं ॥ वातायनं गवाक्षो ऽथ मण्डपो ऽस्त्री जनाश्रयः ॥२८॥ कुट्टिमो ऽस्त्री निबद्धा भूश्चन्द्रशाला शिरोगृहं ॥ ह तालं वीपाश्रयं स्यात् ... वासताः ॥२९॥ हर्म्यादि धनिनां वासः प्रासादो देवभूभुजां ॥ सौधो ऽस्त्री राजसदनमुपकार्योपकारिका ॥३०॥ स्वस्तिकः सर्वतोभद्रो नन्द्यावर्तादयो ऽपि च ॥ विच्छन्दकः प्रभेदा हि भवन्तीश्वरसद्मनां ॥३१॥ स्त्र्यागारं भूभुजामन्तःपुरं स्यादवरोधनं ॥ शुद्धान्तश्चावरोधश्च स्यादट्टः क्षौममस्त्रियां ॥३२॥ प्रघाणप्रघणालिन्दा बहिर्द्वारप्रकोष्ठके ॥ गृहावग्रहणी देहल्यङ्गणं चत्वराजिरे ॥३३॥ अधस्ताद्दारुणि शिला नासा दारूपरि स्थितं ॥ प्रच्छन्नमन्तर्द्वारं स्यात्

दे अन्तरद्वार नामानि २

चित्रकारी गृह नाम ... देवस्थानस्य गृहस्य ... धनपात्र गृह नामानि २

चतुर ... गृहस्य नाम ... ३२ ... अट्टारी नामानि २

विच्छन्दक प्रभेदा रचना विशेषा २ ... पटमण्डपादि राजसदन २ ... चत्वारि नगरी गृहस्य ३

ग्रामसमीप ६ निःश्रेणी सीढि ६ पाषाणपौड़ी ७
कबूतरकारहरणेकास्थान २ नगरनिकासप फरस: करइतिवा ३
देपाष्यद्वारनामानि २ जोती १ पाषाणकी पौड़ी ७ उच्चस्थान २ नीगिहारस्वरग्रामसीमा ६ कपाट इतिख्या: ३
कूड़ाप पार्श्व घनि १ वगन्हेका षोउ ३ देवोकड़ीनामानि २

पक्षद्वारंतु पक्षकं ॥१४॥ वलीकनीध्रे पटलप्रांते थ पटलं छदिः ॥ गोपानसीतु वलभी छादने वक्रदा
रुणि ॥१५॥ कपोतपालिकायांतु विटंकं पुंनपुंसकं ॥ स्त्रीद्वार्द्वारं प्रतीहारः स्याद्वितर्दिस्तु वेदिका ॥१६॥
तोरणोस्त्री बहिर्द्वारं पुरद्वारंतु गोपुरं ॥ कूटं पूर्द्वारि यद्धस्तिनखस्तस्मिन्नथ त्रिषु ॥१७॥ कपाटमर
रं तुल्ये तद्विष्कंभोर्गलं नना ॥ आरोहणं स्यात्सोपानं निश्रेणिस्त्वधिरोहिणी ॥१८॥ संमार्जनी
शोधनी स्यात्संकरोवकरस्तथा ॥ क्षिप्तं मुखं निःशरणं संनिवेशो निकर्षणं ॥१९॥ समौ संव
सथग्रामौ वेश्मभूर्वास्तुरस्त्रियां ॥ ग्रामांत उपशल्यं स्यात्सीमसीमे स्त्रियामुभे ॥२०॥ घोष आभीर
पल्ली स्यात्पक्कणः शवरालयः ॥ पुरवर्गः ॥ महीध्रे शिखरिक्ष्माभृदहार्यधरपर्वताः ॥१॥ अद्रि
गोत्रगिरिग्रावाचलशैलशिलोच्चयाः ॥ लोकालोकश्चक्रवालस्त्रिकूटस्त्रिककुत्समौ ॥२॥
अस्तस्तु चरमक्ष्माभृदुदयः पूर्वपर्वतः ॥ हिमवान्निषधो विंध्यो माल्यवान्पारियात्रकः ॥३॥

कबूतरखा १८ नामो
बहारीप
वसतिम्हम
ग्राम
पर्वतस्य २
२६
देउष्ठसीचलस्प देउरजाड़ ६

ओषधिफलपाके नाविनाशो
यस्यासाओषधिः२

फलेषुप्राप्तेष्वपि फलानिगृह्णातिफलग्रहिः२
देफलमुत्पन्नं यस्य२

वध्नातिफलं वंध्यः अवकेशी अफल२

अंकुराङ्कुरस्योल्लहरो

दीर्घलिकाया:द्वेराधा२ द्वे वनसमूहस्य१ द्वे अंकुरस्य१ अथ वृक्षस्य नामानि१

ध्नैरखा स्तवराजयः॥ वन्या वनसमूहे स्यादंकुरोऽभिनवोद्भिदि॥५३॥ वृक्षो महीरुहः शाखी विटपी पादपस्तरुः॥ अनोकहः कुटः सालः पलाशी द्रुद्रुमागमाः॥५४॥ वानस्पत्यः फलैः पुष्पात्तैरपुष्पाद्वनस्पतिः॥ ओषध्यः फलपाकान्ताः स्यादवंध्यः फलेग्रहिः॥५५॥ वंध्योऽफलो वकेशी च॥ फलवान्फलिनः फली॥५६॥ प्रफुल्लोत्फुल्लसंफुल्लव्याकोशविकचस्फुटाः॥ फुल्लश्चैते विकसिते स्युरवंध्यादयस्त्रिषु॥५७॥ स्थाणुर्वा ना ध्रुवः शंकुर्ह्रस्वशाखाशिफः क्षुपः॥ अप्रकाण्डे स्तंबगुल्मौ वल्ली तु व्रततिर्लता॥५८॥ लता प्रतानिनी वीरुद्गुल्मिन्युलप इत्यपि॥ नागाद्यारोह उच्छ्राय उत्सेधश्चोच्छ्रयश्च सः॥५९॥ अस्त्री प्रकाण्डः स्कन्धः स्यान्मूलाच्छाखावधिस्तरोः॥ समे शाखालते स्कन्धशाखाशाले शिफाजटे॥६०॥ शाखाशिफावरोहः स्यान्मूलाच्चाग्रं गता लता॥ शिरोऽग्रं शिखरं वा ना मूलं बुध्नोंऽघ्रिनामकः॥६१॥ सारो मज्जा नरि त्वक् स्त्री वल्कं वल्कलमस्त्रियाम्॥

१९

पुष्पवृक्षस्य५
शीशिाद्द्रस्वशाखायाः४

अप्रकाण्ड

...अप्रकाण्ड वृक्षपत्रवर्जितः
...कौ द्वौ स्तंबगुल्मौ स्यातां४

पुष्पातरहितः वानस्पतिः

शीशिकील्लकस्य५

१९

शीशिमूलस्य

शीशिवक्षादित्वचः१

शीशिउच्छ्रायस्य५ शीशिनागादि उच्छ्रायस्य३

शीशिलता
मात्रस्य४

मूलादारभ्यशाखां
तःपूर्वभागःप्रकाण्डः२
द्वे मूलेस्कंधस्य२

स्नातीति वा स्नौतीति प्रस्थं भो   शिखास्यास्तीति शिखरं शृंगतीति

प्रपतंति अस्मात् प्रपातः तटजलस्य उत्तर   एकं गिरिसन्निहितभूमेः ५   गौरस्य त्रीणि नामानि २   मध्यभागः २   शिलानामानि ५ उत्सभागस्य २   प्रस्रवतीति प्रस्रवणं

गंधमादनः २

मन्ये च हेमकूटादयो नगाः॥ पाषाणप्रस्तरग्रावोपलाश्मानः शिला दृषत् कूटोस्त्री शिखरं शृं
गं॥३॥ प्रपातस्त्वतटो भृगुः कटकोस्त्री नितंबोद्रेः॥ स्नुः प्रस्थः सानुरस्त्रियां उत्सः प्रस्रवणं वा
रि॥४॥ प्रवाहो निर्झरो झरः दरी तु कंदरो वा स्त्री देवखातबिले गुहा॥६॥ गह्वरं गंडशैलास्तु च्यु
ताः स्थूलोपला गिरेः॥ दंतकास्तु बहिस्तिर्यक् प्रदेशान्निर्गता गिरेः॥७॥ खनिः स्त्रियामाकरः
स्यात् पादाः प्रत्यंतपर्वताः॥ उपत्यकाद्रेरासन्ना भूमिरूर्ध्वमधित्यका॥८॥ धातुर्मनःशिलाद्यद्रे
गैरिकं तु विशेषतः॥ निकुंजकुंजौ वा क्लीबे लतादिपिहितोदरे॥९॥ इति शैलवर्गः॥ अटव्यरण्यं वि
पिनं गहनं काननं वनं॥ महारण्यमरण्यानी गृहारामास्तु निष्कुटाः॥१॥ आरामः स्यादुपवनं
कृत्रिमं वनमेव यत्॥ अमात्यगणिकागेहोपवने वृक्षवाटिका॥२॥ पुमानाक्रीड उद्यानं
राज्ञः साधारणं वनं॥ स्यादेतदेव प्रमदवनमंतःपुरोचितं॥३॥ वीथ्यालिरावलिः पंक्तिः श्रेणी॥

देवपर्वतपादनामानि ४   २९ धातुः ५   वृक्षनामद्वयं २

हेमहारवनस्य २   गंधकोऽभ्रकामित्यादौ धातवो गैरिकमुक्तः ५   घरकान्वीचीर २   पंचपंक्तेः १   वागस्य २ समनारावनः २

बहुदानेन नुरारण्यं प्रमदानि ददाति सुखमिति २   ६५   ९   १ वनेषु   देशाश्मसन्नामनः   एकमंडूकः उद्यानं ५   सुरस्थानस्य नामानि इति   तेन मनःशिला गैरिक   कोटिनीसीसतोहकारस   सहितुल ५   ६

कनयारे २ चत्वारि कचनारस्य १ जभीरी सामान्यस्य २ सताप्डे १ चत्वारि सप्तपर्णस्य १

ग्धकः ॥२१॥ कोविदारे चमरिकः कुदालो युगपत्रकः ॥ सप्तपर्णो विशालत्वक् शारदो विषमछदः ॥
॥२२॥ आरग्वधे राजवृक्षशम्याकचतुरंगुलाः ॥ आरेवतव्याधिघातकृतमालसुवर्णकाः ॥
॥२३॥ स्युर्जंबीरे दंतशठजंभजंभीरजंभलाः ॥ वरुणो वरणः सेतुस्तिक्तशाकः कुमारकः ॥२४॥ पु
न्नागे पुरुषस्तुंगः केसरो देववल्लभः ॥ पारिभद्रे निंबतरुर्मंदारः पारिजातकः ॥२५॥ तिनिशे स्यंदनो
नेमी रथद्रुरतिमुक्तकः ॥ वंजुलश्चित्रकृच्चाथ द्वौ पीतनकपीतनौ ॥२६॥ आम्रातके मधूके तु गुड
पुष्पमधुद्रुमौ ॥ वानप्रस्थमधुष्ठीलौ जलजेत्र मधूलकः ॥२७॥ पीलौ गुडफलः स्रंसी तस्मिंस्तु
गिरिसंभवे ॥ अक्षोटकर्परालौ द्वावंकोटे तु निकोचकः ॥२८॥ पलाशे किंशुकः पर्णो वातपोतो
थ वेतसे ॥ रथाभ्रपुष्पविदुरशीतवानीरवंजुलाः ॥२९॥ द्वौ परिव्याधविदुलौ नादेयी चांबुवेत
से ॥ शोभांजने शिग्रुतीक्ष्णगंधकाक्षीवमोचकाः ॥३०॥ रक्तोसौ मधुशिग्रुः स्यादरिष्टः फेनिलः

पंचसुतंजनस्य १ पर्वतपीलो २ अंकोटकस्य २ केजरीउडारीउ डेस्य १

४

द्वेयुग्म

द्वेनवपत्रा

द्वे दारोः १ पंचइंधनस्य २ अपद्वे २ घुनमेवतः २ द्वे कुसुम द्वे वृक्षविस्तारस्य २

काष्टं दार्विंधनं त्वेध इध्ममेधः समित्स्त्रियां ॥१२॥ निःकुहः कोटरं वा ना वल्लरि मंजरी स्त्रियौ ॥ पत्रं
पलाशं छदनं दलं पर्णं छदः पुमान् ॥१३॥ पल्लवोऽस्त्री किशलयं विस्तारो विटपोऽस्त्रियां ॥ वृक्षादी
नां फलं सस्यं वृंतं प्रसवबंधनं ॥१४॥ आमे फले सलाटुः स्यात् शुष्के वानमुभे त्रिषु ॥ क्षारको जालकं
क्लीबे कलिका कोरकः पुमान् ॥१५॥ स्याद्गुच्छकस्तु स्तवकः कुड्मलो मुकुलोऽस्त्रियां ॥ स्त्रियः सुम
नसः पुष्पं प्रसूनं कुसुमं सुमं ॥१६॥ मकरंदः पुष्परसः परागः सुमनोरजः ॥ द्विहीनं प्रसवे सर्वं ह
रीतक्यादयः स्त्रियां ॥१७॥ आश्वत्थवैणवप्लाक्षनैयग्रोधैंगुदं फले ॥ वार्हतं च फले जंब्वा जंबूः स्त्री
जंबु जांबवं ॥१८॥ पुष्पे जातीप्रभृतयः स्वलिंगा व्रीहयः फले ॥ विदार्याद्यास्तु मूलेपि पुष्पे क्ली
बेपि पाटला ॥१९॥ बोधिद्रुमश्चलदलः पिप्पलः कुंजराशनः ॥ अश्वत्थेथ कपित्थे स्युर्दधित्थ
ग्राहिमन्मथाः ॥२०॥ तस्मिन् दधिफलः पुष्पफलदंतशठावपि ॥ उदुंबरो जंतुफलो यज्ञांगो हेमदु

सप्तकपित्थस्य २ चत्वारि गुलरनामानि २

हरीतक्याः फलं हरीतकी २ पंचजातीप्रभृतिकाम [illegible] २

बील्वफल ४

पट्पत्रस्य २
द्वे फलस्य २
कली ४
द्वे पुष्पमधुनः ५
सुमनसः ७ चत्वारि पुष्प
[illegible]
स्वलिंगद्रव्यस्य २

पुष्पजाली २
द्वे अस्फुटपुष्पस्य २
पुष्पस्यैः ५
कंटूरीफलस्वलिंगद्रव्यस्य २
पिप्पल २

चत्वारि भल्लातकस्य ४
गजहड २

पंचक्रमुकस्य ५ चत्वारि कदंबस्य ४ पारसपीपल ५ इतिख्यातः
पिलखण्डी ३ चत्वारि लोधस्य ४

२१

र्सिका कुमुदिका कुंभीकैडर्यकटफलौ ॥ क्रमुकः पट्टिकाख्यः स्यात्पटी लाक्षा प्रसादनः ॥ ६१ ॥ वीरवृक्षो
रुष्करोग्निमुखी भल्लातकी त्रिषु ॥ गर्दभांडे कंदराल कपीतन सुपार्श्वकाः ॥ ६२ ॥ नूदस्तु यूपः क्रमुको ब्र
ह्मण्यो ब्रह्मदारु च ॥ तूलं च नीपप्रियककदंबास्तु हलिप्रिये ॥ ६३ ॥ प्रचेत्रा तितिडी चिंचाम्लिकाथो पीत
सालके ॥ सर्जकासनबंधूकपुष्पप्रियकजीवकाः ॥ ६४ ॥ साले तु सर्जकार्श्याश्वकर्णकाः सस्यसंव
रः ॥ नदीसर्जो वीरतरुरिंद्रद्रुः ककुभोर्जुनः ॥ ६५ ॥ राजादनः फलाध्यक्षः क्षीरिकायामथ द्वयोः ॥ इंगुदी
तापसतरुर्भूर्जे चर्मिमृदुत्वचौ ॥ ६६ ॥ पिच्छिला पूरणी मोचा स्थिरायुः शाल्मलिर्द्वयोः ॥ पिच्छा तु शाल्मली
वेष्टे चनः कूटशाल्मलिः ॥ ६७ ॥ चिरिबिल्वो नक्तमालः करजश्च करंजके ॥ प्रकीर्यः पूतिकरजः पूतिकः
कलिकारकः ॥ ६८ ॥ करंजभेदाः षड्ग्रंथो मर्कट्यंगारवल्लरी ॥ रोही रोहितकः प्लीहशत्रुर्दाडिमपुष्पकः ॥
॥ ६९ ॥ गायत्री बालतनयः खदिरो दंतधावनः ॥ अरिमेदो विट्खदिरे कदरः खदिरे सिते ॥ ७० ॥ सोमवल्को

२१

त्रीणि अर्जुनस्य
पंच सालस्य ५
त्रीणि खदिरस्य
पंच सिंबलस्य ५
चत्वारि करंजे तिरव्यातस्य २
रोहीतस्य २

अर्जुनस्य ५
धवस्य ४
शिम्ब रोह
तस्य २

चत्वारि खदिरस्य ४ दुर्गंधखदिरस्य १ सितखदिरस्य १
त्रीणि भूर्जपत्रे ४ कटकपुष्कृ नामैकं पृथक् चा ४ चत्वारि करंजके नाम २
शाल्मलिस्य ३

वैरि ५

पंच बिल्वस्य ५ । गुग्गुलवृक्षस्य ३ । त्रीणि प्लक्षस्य २ । त्रीणि पिप्पलवृक्षस्य १ । त्रीणि वटस्य १

समौ ॥ बिल्वे शाण्डिल्यशैलूषौ मालूरश्रीफलावपि ॥ ८१ ॥ प्लक्षो जटी पर्कटी स्यान्न्यग्रोधो बहुपाद्व
टः ॥ गालवः शाबरो लोध्रस्तिरीटस्तिल्वमार्जनौ ॥ ८२ ॥ आम्रश्चूतो रसालोऽसौ सहकारोऽतिसौरभः ॥
कुम्भोलूखलकं क्लीबे कौशिको गुग्गुलुः पुरः ॥ ८३ ॥ शेलुः श्लेष्मातकः शीत उद्दालो बहुवारकः ॥ राजाद
नः पियालः स्यात्सन्नकद्रुर्धनुःपटः ॥ ८४ ॥ गंभारी सर्वतोभद्रा काश्मरी मधुपर्णिका ॥ श्रीपर्णी भद्रपर्णी
च काश्मर्यश्चाप्यथ द्वयोः ॥ ८५ ॥ कर्कन्धूर्बदरी कोलिः कोलं कुवलफेनिले ॥ सौवीरं बदरं घोण्टाप्यथ स्यात्स्वा
दुकण्टकः ॥ ८६ ॥ विकंकतः स्रुवावृक्षो ग्रन्थिलो व्याघ्रपादपि ॥ ऐरावतो नागरंगो नारंगो मुखवासनः ॥
८७ जंबूः स्त्री रभिपात्वा च राजजंबूर्महाफला ॥ स्त्री सप्रवाचे तु जंबूर्नादेयी भूमिजंबुका ॥ ८८ ॥ ति
न्दुकः स्फूर्जकः कालस्कन्धश्च शितिसारके ॥ काकेन्दुः कुलकः काकपीलुकः काकतिन्दुके ॥ ८९ ॥ गो
लीढो झाटलो घण्टापाटलिर्मोक्षमुष्ककौ ॥ तिलकः क्षुरकः श्रीमान्समौ पिचुलझावुकौ ॥ ९० ॥ श्रीप

पंच घंटापाटली इति ख्या । सिहोरा इति ख्या । त्रीणि तिलकवृक्षस्य १ । झाऊ इति ख्या ।

(वाम पार्श्वे:) चत्वारि लोध्रवृक्षस्य २ । चिरौंजीवृक्ष स २ । गंभारीवृक्ष । पंच बाबर(?)वृक्षस्य ४ । पंच जंबुका ३ । चत्वारि किंडुक(?)वृक्षस्य २

(दक्षिण पार्श्वे:) सुगंधः २ । लेसूडावृक्षस्य २ । पंच बदरीफलस्य ५ । चत्वारि नारंग स्य ४ । भूमिजंबुका । कुचलवृक्षस्य २

10

अशोकवृक्षस्य४ अनारवृक्षस्य७

कटफलवृक्षस्य१ समुद्रफलवृक्षस्य१ निंबवृक्षस्य२ शीसिंपावृक्षस्य२ पकस्य२ सीतोवरवृक्षस्य कूकवृक्षस्य१

कंटकिफले स्तौ निचुले हिज्जलोंबुजः ॥२२॥ काकोदुंबरिका फल्गुर्मलयूर्जघनेफला ॥ अरिष्टः सर्वतो
भद्रहिंगुनिर्यासमालकाः ॥२३॥ पिचुमर्दश्च निंबेथ पिच्छिलागुरुशिंशपा ॥ कपिलाभस्मगर्भा सा
शिरीषस्तु कपीतनः ॥२४॥ भंडिलोप्यथ चांपेयश्चंपको हेमपुष्पकः ॥ एतस्य कलिका गंधफली स्यादथ
केसरे ॥२५॥ बकुलो वंजुलोशोके समौ करकदाडिमौ ॥ चांपेयः केसरो नागकेसरः कांचनाह्वयः ॥२६॥
जया जयंती तर्कारी नादेयी वैजयंतिका ॥ श्रीपर्णमग्निमंथः स्यात्कणिका गणिकारिका ॥२७॥ जयो
थ कुटजः शक्रो वत्सको गिरिमल्लिका ॥ एतस्यैव कलिंगेंद्रयवभद्रयवं फले ॥२८॥ कृष्णपाकफलाविग्न
सुषेणाः करमर्दके ॥ कालस्कंधस्तमालः स्यात्तापिच्छोप्यथ सिंदुकः ॥२९॥ सिंदुवारेंद्रसुरसौ निर्गुं
डींद्राणिकेत्यपि ॥ वेणी खरा गरी देवताडो जीमूत इत्यपि ॥३०॥ श्रीहस्तिनी तु भूरुंडी तृणशून्यं तु मल्लि
का ॥ भूपदी शीतभीरुश्च सैवास्फोता वनोद्भवा ॥३१॥ शेफालिका तु सुवहा निर्गुंडी नीलिका च सा ॥

राखेलिइतिख्यातस्य१ पंचदेवताडस्य२ महदीचारनामानि१ हथिकन२

करौंडावृक्षस्य३ तमालतरोः३

पर्थं व्याघ्रपुच्छगंधर्वहस्तकौ॥ एरंडउरुबूकश्च रुचकश्चित्रकश्चंचुः स॥२॥ चंचुः पंचांगुलो मंडवर्द्धमान
व्यडंबकौ॥ अल्पा शमी शमीरः स्याच्छमी सक्तुफला शिवा॥३॥ पिंडीतको मरुवकः श्वसनः करहाट
कः॥ शल्यश्च मदने शक्रपादपः पारिभद्रकः॥४॥ भद्रदारुद्रुकिलिमं पीतदारु च दारु च॥ पूतिकाष्ठं च स
प्तस्युर्देवदारुण्यथ द्वयोः॥५॥ पाटलिः पाटलामोघा काचस्थाली फलेरुहा॥ कृष्णवृंता कुबेराक्षी श्यामा तु महि
लाह्वया॥६॥ लता गोवंदनी गुंद्रा प्रियंगुः फलिनी फली॥ विष्वक्सेना गंधफली कारंभा प्रियकश्च सा॥
॥७॥ मंडूकपर्णपत्रोर्णनटकट्वंगटुंटुकाः॥ स्योनाकशुकनासर्क्षदीर्घवृंतकुटंनटाः॥८॥ शोणाकश्चा
रलौ तिष्यफला त्वामलकी त्रिषु॥ अमृता च वयस्था च त्रिलिंगस्तु बिभीतकः॥९॥ नाक्षस्तुषः कर्षफलो भूता
वासः कलिद्रुमः॥ अभया त्वव्यथा पथ्या कायस्था पूतनामृता॥१०॥ हरीतकी हैमवती चेतकी श्रेयसी शि
वा॥ पीतद्रुः सरलः पूतिकाष्ठं चाथ द्रुमोत्पलः॥११॥ कर्णिकारः परिव्याधो लकुचो लिकुचो डहुः॥ पनसः

श्वेतार्कस्य शिवमल्ली नामाः चतुष्कं वंदाकस्य

२२

कृ

पर्णोत्रस्फ कौलर्कप्रतापसो ॥ शिवमल्ली पाशुपता काष्ठीलो वुको वसुः ॥२२॥ वंदा वृक्षादनी
वृक्षरुहा जीवंतिकेत्यपि ॥ वस्रादनी छिन्नरुहा तंगरू चीतं त्रिकामृता ॥२३॥ जीवंतिका सोमवल्ली
विशल्या मधुपर्ण्यपि ॥ मत्स्यवीरिवी मधुरसा मोरटा तेजसी स्रवा ॥२४॥ मधुस्रविका मधुश्रेणी जो
कर्णी पीलुपर्ण्यपि ॥ पाठांबष्ठा विद्धकर्णी स्थापनी श्रेयसी रसा ॥२५॥ एकाष्ठीला पापचेली
प्राचीना वनतिक्तकं ॥ कटुः कटंभरा सा च रोहिणी कटुरोहिणी ॥२६॥ मत्सा पित्ता कृष्णभेदा
चक्रांगी शकुलादनी ॥ अस्फगुप्ता जहा बंगा कंडूरा प्रावृषायणी ॥२७॥ कृष्णप्रोक्ता मर्कशिं
विः कपिकच्छुरमर्कटी ॥ चित्रोपचित्रा न्यग्रोधी द्रवंती शंबरी वृषा ॥२८॥ प्रत्यक्श्रेणी सुतश्रेणी
श्रेणी रंडा मूषिकपर्ण्यपि ॥ अपामार्गः शैखरिको धामार्गवमयूरकौ ॥२९॥ प्रत्यक्पर्णी
केशपर्णी किणिही खरमंजरी ॥ कपिका ब्राह्मणी पद्मा भार्गी ब्राह्मणयष्टिका ॥३०॥ अंगा

देशभाषा नामाः अथ नामानि पुनर्नवा भाषया अपामार्ग चूटं नामाः

नवनामानि कवाचकी चैवीज कवाच इतिरव्या नामाः देशभाषा कारसी नामर

नवनामानि गिलोय २
नवनामानि अरूसा ३
पाठा
कटुका नाम
मर्कटी ...
...
२३

13

रक्तकुब्जा गुलाब ४

श्वेतस्या एव श्वेतपुष्पा नामा २ श्रीशिवकुब्जा रे २ चंवेली २ मालती नामा २ द्वे नमालमाः २

सितासौ श्वेतिसुरसा भूतवेश्यथ मागधी ॥ गणिका यूथिकांबष्टा सा पीता हेमपुष्पिका ॥२२॥ अति
मुक्तः पुंड्रकः स्याद्वासंती माधवीलता ॥ सुमना मालती जातिः सप्तला नवमालिका ॥२३॥ माध्यं कुंदं रक्त
कस्तु बंधूको बंधुजीवकः ॥ सहा कुमारी तरणिरम्लानस्तु महासहा ॥२४॥ तत्र शोणे कुरुवकस्तत्र पीते कु
रंटकः ॥ नीला झिंटी द्वयोर्बाणा दासी चार्तगलश्च सा ॥२५॥ सैरेयकस्तु झिंटी स्यात्तस्मिन् कुरुवकोरुणे
पीते कुरंटको झिंटी तस्मिन् सहचरी द्वयोः ॥२६॥ ओड्रपुष्पं जपावज्रपुष्पं पुष्पं तिलस्य यत् ॥ प्रतिहा
सः शतप्रासचंडातहयमारकाः ॥२७॥ करवीरे करीरे तु क्रकरग्रंथिलावुभौ ॥ उन्मत्तः कितवो धूर्तो धत्तू
रः कनकाह्वयः ॥२८॥ मातुलो मदनश्चास्य फले मातुलपुत्रकः ॥ फलपूरो बीजपूरो रुचको मातुलिंगके ॥
॥२९॥ समीरणो मरुवकः प्रस्थपुष्पः फणिज्जकः ॥ जंबीरोप्यथ पर्णासे कठिंजरकुठेरकौ ॥३०॥ सिते
र्जकोत्र पाठी तु चित्रको वह्निसंज्ञकः ॥ अर्काह्ववसुकास्फोटगणरूपविकीरणाः ॥३१॥ मंदारश्चार्क

श्रीशिवचित्रेति ख्याता २ पंचमुखेति ख्यात स्यः २
चित्रके नामा २ श्रीशिवकरीर स्य ४ जंभीरे २

केतकी भावरत्न सदृश पत्राया
श्रीशिवपुष्पतरी या इति ख्या
२
पंच करवीर गुल्म स्य ४
धत्तूर नामा
पंचमहच्छ्रमार २

द्वे कुंदनामा
तिलपुष्प नामाः
सप्त घंटेति नामा ४
चतुर्भवबीजपूर नामा
१ मातुलिंगनामाः

कृष्णप्रोक्ता भीरुपत्री नारायण्यः शतावरी २

नूदीध   रुधी

प्रतिविषातिविषाँपविषा सूक्ता ॥५०॥ अंगीमहौषधं चाथ सीरा वीदु गुन्धिका समै ॥ शतमूली वहुसुता भीरु

रिंदीवरी वरी ॥५१॥ लीशारदी तोयपिप्पली शकुलानदी ॥ खराश्वा कारवी दीप्यामयूरो लोचमस्तकः ॥५२॥

गोपीश्यामा सारिवा स्यादनंतोत्पलशारिवा ॥ योगयम्बकिः सिद्धिलतैौर्वदेश्यां रूपाइमे ॥५३॥ कदली वार

णावुसा रंभामोचांशुमत्फला ॥ काष्ठीलो मुरुपर्णी तु कोंमुद्गा सहेत्यपि ॥५४॥ वार्त्ताकी हिंगुली सिंही भंडाकी

दुःप्रधर्षिणी ॥ नाकुली सुरसा रास्ना सुगंधा गंधनाकुली ॥५५॥ मकुष्ठो भुजंगाक्षी छत्राकी सुवहा

चसा ॥ विदारिगंधांशुमती शालपर्णी स्थिरा ध्रुवा ॥५६॥ तुंडिकेरी समुद्रांता कर्पासी वदरेति च ॥ भारद्वाजी

तु सा वन्याशृंगी तु वृषभो वृषः ॥५७॥ गांगेरुकी नागवला झषा ह्रस्वगवेधुका ॥ धामार्गवो घोषकः स्या

न्महाजाली सपीतकः ॥५८॥ ज्योत्स्नी पटोलिका जाली नादेयी भूमिजंबुका ॥ स्याल्लांगलिक्यग्निशिखा

काकांगी काकनासिका ॥५९॥ गोधापदी तु सुवहा मुशली तालमूलिका ॥ अजशृंगी विषाणी स्याज्जोडि

काकजंघानाम १   हंसपदी १   मुसलीकंद २   तारमूली १   ककडाश्रृंगी १

रूपऔषधी ३   गुरुसकरी ३   तोर्या २

२४ शतावरी २
पंचवनमठ २
कलेक
तिमाघाछ
पचशालपर्णी ४
७

मपूरशिखा
इद्रिवारुइ २
वैगण ४
वे
चलारिकपसिध
देलाकाघोषनाम २
दिलांगलिका
२४

15

नवनामानि भाङ्गीरी [illegible] वृ.नामाः मंडूकपर्णीवृ.नामाः

रवड्डी बालेयष्टा ककर्दुरिकईका: ॥ मजिष्टा विकसा लिंगी समंगा कालमेषिका ॥ ४१ ॥ मंडूकपर्णी भंडीरी भ-
डीयोजनवल्यपि ॥ यासो यवासो दुःस्पर्शो धन्वयासः कुनासकः ॥ ४२ ॥ रोदनी कच्छुरानंता समुद्रांता दुराल-
भा ॥ पृश्निपर्णी पृथक्पर्णी चित्रपर्ण्यंघ्रिवल्लिका ॥ ४३ ॥ क्रोष्टुविन्ना सिंहपुच्छी कलशि धावनि गुहा
॥ निदिग्धिका स्पृशी व्याघ्री बृहती कंटकारिका ॥ ४४ ॥ प्रचोदिनी कुली क्षुद्रा दुःस्पर्शा राष्ट्रिकेत्यपि ॥
नीली काली क्लीतकिका ग्रामीणा मधुपर्णिका ॥ ४५ ॥ रंजनी श्रीफली तुत्था द्रोणी दोला च नीलि-
नी ॥ अवल्गुजः सोमराजी सुवल्लिः सोमवल्लिका ॥ ४६ ॥ कालमेषी कृष्णफला वाकुची पूतिफल्यपि ॥
कृष्णोपकुल्या वैदेही मागधी चपला कणा ॥ ४७ ॥ ऊषणा पिप्पली शौंडी कोलाप्यथ करिपिप्पली ॥
कपिवल्ली कोलवल्ली श्रेयसी वशिरः पुमान् ॥ ४८ ॥ चव्यं तु चविका काकचिंची गुंजे तु कृष्णला ॥ प-
लंकषा त्विक्षुगंधा श्वदंष्ट्रा स्वादुकंटकः ॥ ४९ ॥ गोकंटको गोक्षुरको वनशृंगाट इत्यपि ॥ विश्वा विषा

कुनासक वृ.नामाः
पृश्निपर्णी वृ.नामाः
मधुपर्णिका वृ.नामाः
सोमवल्लिका वृ.नामाः
[illegible] वृ.नामाः
गजपिप्पली

यवासः वृ.नामाः
पृथक्पर्णी वृ.नामाः
क्रोष्टुविन्ना वृ.नामाः
नीलिनी वृ.नामाः
वाकुची वृ.नामाः
पिप्पली वृ.नामाः
रक्तक वृ.नामाः

[illegible] वृ.नामाः
गोकंटक वृ.नामाः

भषउा

चावकर

वहाड़ी थ्रसा शिलाजीतुर   पालंकीशाक२   पंचालकृष्णानामर   वालंह्रीवेरंबर्हिष्ठोदीच्यंकेशांबु नामंच

गंधा क्रोष्टी च या सिता ॥२०॥ अन्या क्षीरविदारी स्यान्महाश्वेतर्क्षगंधिका ॥२०॥ [illegible]
[illegible] ॥ कालानुसार्यवृद्धाश्मपुष्पशीतशिवानि तु ॥२१॥ एलावालुकमैलेयं सुगंधि हरिवालुकं ॥ वा
लुकं चाथ पालंक्यां मुकुंदः कुंदकुंदुरू ॥२२॥ शैलेयं तालपर्णी तु दैत्या गंधकुटी मुरा ॥ गंधिभस्रा
तु सुवहा गंधिनी सुरभी रसा ॥२३॥ महेरणा कुंदुरुकी सल्लकी ह्लादिनीति च ॥ अग्निज्वालासु
भिक्षे तु धातकी धातुपुष्पिका ॥२४॥ पृथ्वीका चंद्रवालैला निष्कुटिर्बहुलाथ सा ॥ सूक्ष्मोपकुंचि
का तुत्था कोरंगी त्रिपुटा त्रुटिः ॥२५॥ व्याधिः कुष्ठं पारिभाव्यं व्याप्यं पाकलमुत्पलं ॥ शंखिनी
चोरपुष्पी स्यात्केशिन्यथ वितुन्नकः ॥२६॥ झटामला ज्झटा ताली शिवा तामलकीति च ॥ प्रपौंडरी
कं प्रौंडर्यमथ तुन्नः कुबेरकः ॥२७॥ कुणिः कच्छः कांतलको नंदीवृक्षोऽथ राक्षसी ॥ चंडा धनहरी क्षे
मदुःपत्रगणहासकाः ॥२८॥ व्यालायुधं व्याघ्रनखं करजं चक्रकारकं ॥ सुषिरा विद्रुमलता कपोतांघ्रिर्नटी

गंधद्रव्यमेतत्१   नखनामर   नदीनम्निगंधद्रव्ये१ नेरव्रजोस्पर

जावदत्रसस्य
दसिरातनोर
चौध
संवालीनीर
पुंजरी२

पंचसुरस्य गंध
ऐसस्रुनप४
कुजीनाश्चीप
कुठ
सम्मिश्रामालिकीव

छेगोजिह्वी। पानेतायाः २ वे बटरेणुकायाः २ ६

हारांर्द्विकैस्तमे ॥९०॥ तांबूलवल्ली तांबूली नागवल्ल्यप्यथ द्विजा ॥ हरेणू रेणुका कौंती कपिला भस्मगंधि-

नी ॥९१॥ वालं ह्रीवेरवर्हिष्ठोदीच्यं केशाम्बुनाम च ॥ ऋष्यप्रोक्ताभीरुपत्रीनारायण्यः शतावरी ॥ अहेरुरथ पीतद्रुकालेयकहरिद्रव ॥९२॥

दार्वीपचंपचादारुहरिद्रापर्जनी ॥ वचोग्रगंधाषड्ग्रंथागोलोमीशतपर्विका ॥९३॥ शुक्ला हैमवती वै-

द्यमातृसिंह्यौ तु वासिका ॥ वृषोऽटरूषः सिंहास्यो वासको वाजिदंतकः ॥९४॥ आस्फोता गिरिकर्णी स्या-

द्विष्णुक्रांतापराजिता ॥ इक्षुगंधा तु कांडेक्षुकोकिलाक्षेक्षुरक्षुराः ॥९५॥ शालेयः स्याच्छीतशिवश्छत्रा

मधुरिका मिसिः ॥ मिश्रेयाप्यथ सीहुंडो वज्रः स्नुक् स्त्री स्नुही गुडा ॥९६॥ समंतदुग्धाथो वेल्लममोघा

चित्रतंदुला तंदुलश्च कृमिघ्नश्च विडंगं पुन्नपुंसकं ॥९७॥ बला वाट्यालका घंटारवा तु शणपुष्पिका

मधुकं क्लीतकं यष्टिमधुकं मधुयष्टिका ॥ मृद्वीका गोस्तनी द्राक्षा स्वाद्वी मधुरसेति च ॥९८॥ सर्वानुभूतिः सरला त्रिपुटा त्रिवृता त्रिवृत् ॥ त्रिभंडी रेचनी श्यामापालिंद्यौ तु सुषेणिका ॥९९॥ विदारी क्षीरशुक्लेक्षु-

१८

चत्वारि हट्टविलासिन्याः २ शंखनी १ सुगंधद्रव्यमातुलाख्यं २

नली ॥१३६॥ धमन्यंजनकेशी च हनुर्हट्टविलासिनी ॥ शुक्तिः शंखः खुरः कोलदलं नखमथाढकी
गाजर २ ॥१३७॥ काक्षी मृत्स्ना तुवरिका मृत्तालकसुराष्ट्रजे ॥ कुटंनटं दशपुरं वानेयं परिपेलवं ॥१३८॥ प्लवगोपु
सुधा २ रगोनर्दकैवर्तीमुस्तकान्यपि ॥ ग्रंथिपर्णं शुकं बर्हं पुष्पं स्थौणेयकुक्कुरे ॥१३९॥ मरुन्माला तु पिशुना सुगंधद्रव्यमानुताख्यं २
स्पृक्का देवी लता लघुः ॥ समुद्रांता वधूः कोटिवर्षा लंकोपिकेत्यपि ॥१४०॥ तपस्विनी जटामांसी जटिला लो जटावती ति ख्याता २
तजपत्र ५ मशामिषी ॥ त्वक्पत्रमुत्कटं भृंगं त्वचं चोचं वरांगकं ॥१४१॥ कर्चूरको द्राविडकः काल्पको वेधमुख्यकः ॥ ओष त कचूर इति ख्याता ५
ध्यो जातिमात्रे स्युरजातौ सर्वमौषधं ॥१४२॥ शाकाख्यं पत्रपुष्पादि तंडुलीयोल्पमारिषः ॥ विशल्याग्निशिखा तालुा
नंता फलिनी शक्रपुष्प्यपि ॥१४३॥ स्यादृक्षगंधा छगलांत्र्यावेगी वृद्धदारकः ॥ जुंगो ब्राह्मी तु मत्स्याक्षी ब्राह्मी बूटी ति ख्याता २
वयस्था सोमवल्लरी ॥१४४॥ पटुपर्णी हैमवती स्वर्णक्षीरी हिमावती ॥ हयपुच्छी तु कांबोजी माषपर्णी माषपर्णी नाम २
महासहा ॥१४५॥ तुंडिकेरी रक्तफला बिंबिका पीलुपर्ण्यपि ॥ बर्बरा कबरी तुंगी खरपुष्पाजगंधिका

कंटूरी नाम १ वं चोक २ विधारा खुला ६४ पंचवरवर शाकस्प १
बीध हयप २

भद्रमोथा ३ शुंठी दुबुर नडस्य श्वेतदूर्वायाः ५ कुरुविंदो मेघनामा ४ नागरमोथा ५

२१

दशवंशस्य ३

ग्रंथेः ४

सि

पद्मीमूलस्य ३

वीर्याभार्गव्यौरुहानंताथसासिता ॥७॥ गोलोमी शतवीर्या च गंडाली शकुलाक्षकः ॥ मुस्ता मुस्तकमस्त्रियां ॥८॥ स्याद्भद्रमुस्तको गुंद्रा च जलान्नकं लोच्छटा ॥ वंशे त्वक्सार कर्मार त्वचिसार तृणध्वजाः ॥१०॥ शतपर्व यवफलो वेणुमस्करतेजनाः ॥ वेणवः कीचकास्ते स्युर्ये स्वनंत्यनिलोद्धताः ॥११॥ ग्रंथिर्ना पर्वपरुषी गुंद्रस्तेजनकः शरः ॥ नडस्तु धमनः पोटगलोथो काशमस्त्रियां ॥१२॥ इक्षुगंधा पोटगलः पुंभूम्नि तु बल्वजाः ॥ रसाल इक्षुस्तद्भेदाः पुंड्रकांतारकादयः ॥१३॥ स्याद्वीरणं वीरतरं मूलेस्योशीरमस्त्रियां ॥ अभयं नलदं सेव्यममृणालं जलाशयं ॥१४॥ लामज्जकं लघुलयमवदाहेष्टकापथे ॥ नडादयस्तृणं गर्मुच्छ्यामाकप्रमुखा अपि ॥१५॥ अस्त्री कुशं कुथो दर्भः पवित्रमथ कत्तृणं ॥ पौरसौगंधिकध्यामदेवजग्धकरौहिषं ॥१६॥ छत्रातिछत्रपालघ्नौ मालातृणकभूस्तृणे ॥ शष्पं बालतृणं घासो यवसं तृणमर्जुनं ॥१७॥ तृणानां संहतिस्तृण्यापेन ड्या तु नड

काहीध

पड्डीय

जलतृणस्य ३

२१

रामकाई ३ तिरया ३ नवतृणस्य ३ श्री तृणसमूहस्य १ नडसमूहस्य १

तृणविशेषस्य ३ वगा ३५ गवाइ तिरया ५ पवरिस्तृणविशेषस्य ३

काकमाच्या: ३

सुरस्तुनी इतिख्यातायाः २ कटुकस्य ... चत्वारि ... मान केयूरी १

घ्रौ वितुन्नं सुनिषण्णकं ॥ स्याद्वातकः शीतलोपराजिता शणपर्ण्यपि ॥ ८१ ॥ पारापतांघ्रिः कटभी पण्या
ज्योतिष्मती लता ॥ वार्षिकं त्रायमाणा स्यात् त्रायन्ती बलभद्रिका ॥ २ ॥ विष्वक्सेनप्रिया गृष्टिर्वाराही ब
दरेत्यपि ॥ मार्कवो भृङ्गराजः स्यात् काकमाची तु वायसी ॥ १ ॥ शतपुष्पा सितच्छत्रातिच्छत्रा मधुरा
मिसिः ॥ अवाक्पुष्पी कारवी च सरणा तु प्रसारणी ॥ २ ॥ तस्यां कटंभरा राजबला भद्रबलेति च
॥ जनी जतूका रजनी जतुकृच्चक्रवर्तिनी ॥ ३ ॥ संस्पर्शाथ शटी गन्धमूली षड्ग्रन्थिकेत्यपि ॥ कर्चू
रोपि पलाशोथ कारवेल्लः कठिल्लकः ॥ ४ ॥ सुषवी चाथ कुलकं पटोलस्तिक्तकः पटुः ॥ कूष्मा
ण्डकस्तु कर्कारुः ॥ ॥ उर्वारुः कर्कटी स्त्रियौ ॥ ५ ॥ इक्ष्वाकुः कटुतुंबी स्यात्तुंब्यलाबूरुभे समे ॥ चि
त्रा गवाक्षी गोडुम्बा विशाला त्विन्द्रवारुणी ॥ ६ ॥ अर्शोघ्नः सूरणः कन्दो गण्डीरस्तु समष्ठिला ॥
कलम्बुरुपोदिका स्त्री तु मूलकं हिलमोचिका ॥ ७ ॥ वास्तुकं शाकभेदाः स्युर्दूर्वा तु शतपर्विका ॥ सहस्र

मा
भृंगराज इतिख्यातस्य २
सुदर्शन ५
पेठा ३
चिभडउ २

वाराहक्रांताया:
चामरालु इतिख्याता २
सुनकासीप ३
गंधभद्रौ इतिख्यातायाः ३
गंधपलाशः कचूर ५
कटुपटोल ४
मिष्टतूंब्या ३
शाकभेदस्य २

मूला १
शाकभेदस्य १
करैला ४ ककडी ३ तुम्मा २
वापृ १
कटुतुंबी २
सामतादूर्वाया: १

वातवद्वेगीमृगोवातमृगः मध्यपद
लोपीसमासः १

२४ पाडाइतिभाषा १ मृगः अजिनयोनयः हरिणाजाताः २ कुरंगस्य १ मृगकस्य ५ अष्टापदः ४ गवाकृतिःनीलाइतिख्याता ४

२८

चमरोमहिषाकृतिः मृगः त
सुसृच्चामरः प्रमीपदहरि
णभेदाकावेजानामुत्तपदैश्च
नामप्रसिद्धः ४

मकडीइतिख्याता ३

॥ मीर्वातमृगः कोकईहामृगोवृकः ॥२७॥ मृगेकुरंगवातायुहरिणाजिनयोनयः ॥ [illegible]
मः [illegible] णेयमेण्याश्चर्माद्यमैणस्यैतामुभेत्रिषु ॥२८॥ कदलीकंदलीचीनश्चमूरुप्रियकाव
पि ॥ समूरुश्चेतिहरिणाअमीअजिनयोनयः ॥२९॥ कृष्णसाररुरुन्यंकुरंकुशंवररौहिषाः
॥ गोकर्णपृषतैणर्श्यरोहिताश्चमरोमृगाः ॥३०॥ गंधर्वःशरभोरामःसृमरोगवयःशशः
॥ इत्यादयोमृगेन्द्राद्यागवाद्याःपशुजातयः ॥३१॥ उंदुरुर्मूषिकोप्याखुर्गिरिकाबालमूषि
का ॥ छुछुंदरीगंधमूषीदीर्घतुंडारिवाधिका ॥३२॥ सरटःकृकलासःस्यान्मुशलीगृहगो
धिका ॥३३॥ लूतास्त्रीतंतुवायोर्णनाभमर्कटकाःसमाः ॥ नीलंगुस्तुकृमिःकर्णजलौका
शतपद्युभे ॥३४॥ वृश्चिकःशूककीटःस्यादलिद्रुणौतुवृश्चिके ॥ पारावतःकलरवःकपोतोथ
शशादनः ॥३५॥ पत्रीश्येनउलूकेतुवायसारातिपेचकौ ॥ व्याघ्राटःस्याद्भरद्वाजःखंजरीट

सहाइतिख्याता ४
मूषिकाएवा
किरलीइतिख्याता ४
कर्णखजूराइतिख्याता ३
वनकबूतर २
२८

शकिरा १ कृमिभेदस्य २ उल्लूभाषा १ पक्षीविशेषस्य २

कृष्णास्यः शशान्तदारारूपो मृगविशेषाः मृगेन्द्राद्याः कनखजूराइतिख्यातस्य २ सूक्ष्मजंतुमात्रस्य २
शशांतापशुजातयः पशुविशेषाः गवाद्याश्चसमाः लोलशीरकिरलाइतिख्याता ४
अपशुजातयः ५

23

एतेताल नारिकेर पूगास्त्रियो हिंताल
चेतुर्थः खर्जूरादय श्चत्वारः ५ एते तरा
द्रुमास्तृ तरा जातीयाः २

तरक्षुचित्ता इति ख्या ४

सुपारीवृक्षस्य १ सुपारीफलस्य १

संहतिः ॥ तृणराजाह्वयः स्तालो नाडिकेरस्तु लांगली ॥१६॥ घोंटा तु पूगः क्रमुको गुवाकः खपुरोस्य
तु ॥ फलमुद्वेगमेते च हिंतालसहितास्त्रयः ॥१७॥ खर्जूरिः केतकी ताडी खर्जूरी च तृणद्रुमाः ॥ इति व

सिंहस्य ३ नौषधिवर्गः ॥ सिंहो मृगेंद्रः पंचास्यो हर्यक्षः केसरी हरिः ॥२०॥ कंठीरवो मृगहा धीरो मृगारिर्नख

वघोरा ४ रायुधः ॥ शार्दूलद्वीपिनौ व्याघ्रे तरक्षुस्तु मृगादनः ॥२१॥ वराहः सूकरो घृष्टिः कोलः पोत्री शूकरस्य ४

किरिः किटिः ॥ दंष्ट्री घोणी स्तब्धरोमा क्रोडो भूदार इत्यपि ॥२२॥ कपिः प्लवंगः प्लवगशाखामृगव

वानरस्य ४ लीमुखाः ॥ मर्कटो वानरः कीशो वनौका अथ भल्लुके ॥२३॥ ऋक्षाच्छभल्लभल्लूका गंडके खड्गख गोंडा इति ख्यातस्य ४

ड्गिनौ ॥ लुलायो महिषो वाहद्विषत्कासरसैरिभाः ॥२४॥ स्त्रियां शिवा भूरिमायुर्गोमायुर्मृगधूर्त

जंबुकस्य ८ कः ॥ शृगालवंचकक्रोष्टुफेरुफेरवजंबुकाः ॥२५॥ ओतुर्बिडालो मार्जारो वृषदंशक आखुभुक् ॥ पंचविडालस्य ५

गोधेर १ त्रयो गोधारगोधेयो गोधिकात्मजे ॥२६॥ श्वाविसु शल्यस्तल्लोम्नि शलली शललं शलं ॥ वातप्र

गोह नामानि १ सेह इति ख्यातस्य २ सेहलोम्नः २

वनमहिषस्य २ चत्वारि भल्लूकस्य ४

२९

चामचडिक्ष्वर मुरगाइतिख्याताया:३ द्वेवनमक्षिका चमगिदूर२ पाः३ बकपोतः२ मक्षाडिड्शलहि४ नीलपक्षि

तः [illegible] ॥४४॥ शरारिराटिराडिश्च बलाका बिसकंठिका॥ हंसस्य योषिद्वरटी सारसस्य तु लक्ष्मणा॥ ॥४५॥ जतुकाजिनपत्रा स्यात् परोष्णी तैलपायिका॥ वर्वणा मक्षिका नीला सरघा मधुमक्षिका॥ ॥४६॥ पतंगिका पुत्तिका स्याद्दंशस्तु वनमक्षिका॥ दंशी तज्जातिरल्पा स्याद्गंधोली वरटा द्रुता॥ ॥४७॥ भृंगारी चीरुका चीरी झिल्लिका च समा इमाः॥ समौ पतंगशलभौ खद्योतो ज्योतिरिंगणः॥ ॥४८॥ मधुव्रतो मधुकरो मधुलिण्मधुपालिनः॥ द्विरेफपुष्पलिड्भृंगषट्पदभ्रमरालयः॥ ॥५०॥ मयूरो बर्हिणो बर्हीनीलकंठो भुजंगभुक्॥ शिखावलः शिखी केकी मेघनादानुलास्यपि॥ ॥५१॥ केका वाणी मयूरस्य समौ चंद्रकमेचकौ॥ शिखा चूडा शिखंडस्तु पिच्छबर्हे नपुंसके॥ ॥५२॥ खगे विहंगविहगविहंगमविहायसः॥ शकुंतिपक्षिशकुनिशकुंतशकुनद्विजाः॥ ॥५३॥ पतत्रिपत्रिपतगपतत्पत्ररथांडजाः॥ नगौकोवाजिविकिरविविष्किरपतत्रयः॥ ॥५४॥ नीडोद्भवा गरुत्मंतः पित्संतो नभसंगमाः॥ तेषां विशेषा हारीतो

पतंगस्य२ चिंडा४ नवमयूरस्य४ द्वेचंद्रस्य बिंदुः स्यचंद्रकांते३

द्वेमधुमक्षिकायाः२ झिल्मिडी२ द्यातानि४ भ्रमरस्य एकं मयूररुतस्य

पत्रि २९

द्वाविंशतिनामानि पक्षिणः१

द्वेमयूरशिखायाः३ त्रीणिपिच्छस्य२

पक्षीविशेषस्य ४ घरचिडी इति ख्यातस्य ३

मीमोला इति ख्या १ ढींगुजुला हापची १ पपीहा २ नीलकंठ पक्षी १ धेनुस्त्वानामधेयं ३

स्तु खंजनः ॥१६॥ लोहपृष्ठस्तु कंकः स्यादथ चाषः किकीदिविः ॥ कलिंगभृंगधूम्याटा अथ स्या
च्छतपत्रकः ॥१७॥ दार्वाघाटो ऽथ सारंगस्तोककश्चातकः समाः ॥ कृकवाकुस्ताम्रचूडः कुक्कुटश्चर
णायुधः ॥१८॥ चटकः कलविंकः स्यात्तस्य स्त्री चटका तयोः ॥ पुमपत्ये चाटकैरः स्त्र्यपत्ये चटकैव
हि ॥१९॥ कर्करेटुः करेटुः स्यात् कृकणक्रकरौ समौ ॥ वनप्रियः परभृतः कोकिलः पिक इत्यपि ॥
॥२०॥ काके तु करटारिष्टबलिपुष्टसकृत्प्रजाः ॥ ध्वांक्षात्मघोषपरभृद्बलिभुग्वायसा अपि
॥२१॥ द्रोणकाकस्तु काकोलो दात्यूहः कालकंठकः ॥ आतापिचिल्लौ दाक्षाय्यगृध्रौ कीरशुकौ
समौ ॥२२॥ क्रुंक्रौंचोऽथ वकः कंकः पुष्कराह्वस्तु सारसः ॥ कोकश्चक्रश्चक्रवाको रथांगाह्वयनाम
कः ॥२३॥ कादंबः कलहंसः स्यादुत्क्रोशकुररौ समौ ॥ हंसास्तु श्वेतगरुतश्चक्रांगा मानसौक
सः ॥२४॥ राजहंसास्तु ते चंचुचरणैर्लोहितैः सिताः ॥ मलिनैर्मल्लिकाक्षास्ते धार्तराष्ट्राः सिते

तबारा नाम पक्षी २ | घरचिडा इति ख्यातस्य २ | पक्षिविशेषः ४ | जलकाकस्य ४ | कूजपक्षिणः ३

ककडिना मानि २ | कोकिला इति ख्यातस्य ४ | द्रोणकाकस्य ५ | हे गृध्रपक्षिणः ५ तोता इति ४ | चकवा इति ख्या २ | चत्वारि सामान्येन राजहंसस्य २

हेकुरर इति ख्यातस्य १ लाट पक्षी नामा टिटिहरी २ एकं हंसभेदस्य ची

कलहंसस्य २ वगुला ३ सारस २ श्वेतकाकस्य ४ हे[illegible]

मनुष्याजातिमात्रस्य ... स्त्रियः ५ ... विशेषाणां

मनुष्यमात्रस्य ९

२.

मनुष्या मानुषा मर्त्या मनुजा मानवा नराः ॥ स्युः पुमांसः पंचजनाः पुरुषाः पूरुषा नरः ॥१॥
स्त्री योषिदबला योषा नारी सीमंतिनी वधूः ॥ प्रतीपदर्शिनी वामा वनिता महिला तथा ॥२॥
विशेषास्त्वंगना भीरुः कामिनी वामलोचना ॥ प्रमदा भाविनी कांता ललना च नितंबि-
नी ॥३॥ सुंदरी रमणी रामा कोपना सैव भामिनी ॥ वरारोहा मत्तकाशिन्युत्तमा वरवर्णिनी
॥४॥ कृताभिषेका महिषी भोगिन्योन्या नृपस्त्रियः ॥ पत्नी पाणिगृहीती च द्वितीया सहधर्मि-
णी ॥५॥ भार्या जायाथ पुंभूम्नि दाराः स्यात्तु कुटुंबिनी ॥ पुरंध्री सुचरित्रा तु सती साध्वी पतिव्रता ॥
॥६॥ कृतसापत्निकाध्यूढाधिविन्नाथ स्वयंवरा ॥ पतिंवरा च वर्याथ कुलस्त्री कुलपालिका
॥७॥ कन्या कुमारी गौरी तु नग्निकानागतार्तवा ॥ स्यान्मध्यमा दृष्टरजास्तरुणी युवतिः स-
मे ॥८॥ समाः स्नुषा जनीवध्वौ चिरंटी तु सुवासिनी ॥ इच्छावती कामुका स्याद्वृषस्यंती तु का-

स्त्रीमात्रस्य

प्रशंसितो ... स्त्रियः ४

महादेव्याः ५

पंचजायायाः ५

येन विवाहधर्मं कृतं तस्य प्रथमा या स्त्री तस्य नामानि त्रीणि २

पतिव्रतायाः ४

कुलनायाः

२.

पुत्रादिमायायाः १ — द्वेषिण्याः ... स्यतायाः १ — धनादिहतपुत्रायाः — मिथुनेच्छायाः १

प्रथमेत्री ... योग्यायाः २

त्रीणि ... नागतस्य २ — स्वेच्छाकृतपतिवरणायाः ३

महिषी तो न्या ... कृताभिषेका ५ पुत्रदुहित्रादि

भर्त्ताः पतिसहिता
नाम्नी ४

28

हरितालइतिख्यातः२ पत्तनाम१ तितर वनकुक्कुट१ चकवा१ सप्तशिरोः४ चकोर१ धोंडा द्वेपक्षमूलस्य टिट्टिहड़ी

वत्तकर

मंगुः कारण्डवः प्लवः ॥५५॥ तित्तिरिः कुक्कुभो लावो जीवंजीवश्चकोरकः ॥ कोयष्टिकष्टिट्टिभको व

र्तको वर्तिकादयः ॥५६॥ गरुत्पक्षच्छदः पत्रं पतत्रं च तनूरुहं ॥ स्त्री पक्षतिः पक्षमूलं चंचुस्त्रोटि

रुभे स्त्रियां ॥५७॥ प्रडीनोड्डीनसंडीनान्येताः खगगतिक्रियाः ॥ पेशीकोशो द्विहीनेंडं कुलायो नी

डमस्त्रियां ॥५८॥ पोतः पाकोऽर्भको डिंभः पृथुकः शावकः शिशुः ॥ स्त्री पुंसौ मिथुनं द्वंद्वं युग्मं तु युग

लं युगं ॥५९॥ समूहनिवहव्यूहसंदोहविसरव्रजाः ॥ स्तोमौघनिकरव्रातवारसंघातसंचयाः ॥

६०॥ समुदायः समुदयः समवायश्चयो गणाः ॥ स्त्रियां तु संहतिर्वृंदं निकुरंबं कदंबकं ॥६१॥ वृंदभे

दाः समैर्वर्गः संघसार्थौ तु जंतुभिः ॥ सजातीयैः कुलं यूथं तिरश्चां पुन्नपुंसकं ॥६२॥ पशूनां स

मजोऽन्येषां समाजोऽथ सधर्मिणां ॥ स्यान्निकायः पुंजराशी तूत्करः कूटमस्त्रियां ॥६३॥

कापोतशौकमायूरतैत्तिरादीनि तद्गणे ॥ गृहासक्ताः पक्षिमृगाश्छेकास्ते गृह्यकाश्च ते ॥६४॥

इतिसिंहादिवर्गः १

स्त्रीशिशुयुगमात्रस्य५

द्वे चंचुनाम२

द्वे मिथुनस्य५

द्वाविंशति समूहस्य५

एतेन सामान्यस्य४

चत्वारि [illegible]राशिः२

५

कपोतादीनां वर्गे१

सजातीयैः यथा [illegible] विजातीयैः जंतुभिः संघः ३ द्वे संघसार्थौ

स्याता [illegible]

सधर्मिणां समानं धर्मिणां संघः २

असितपलितयोः क्नीशइत्येके १

अप्ररजस्वलायाः ४

वेश्यायाः १

३१

रजस्वलायाः ३

अन्नपानादिद्रव्यविशेषवलाग भिलाषिणीः ४

स्याः २

लक्षणादिनाशुभाशुभज्ञानेव

रजः पुष्पस्य ३

द्विः परिणीताः ५

सिक्नीस्यादवृद्धायाप्रेष्यांतःपुरचारिणी ॥८२॥ वारस्त्रीगणिकावेश्यारूपाजीवाथसाजनैः सत्कृतावारमुख्यास्यात्कुट्टनीसंभलीसमे ॥८३॥ विप्रश्निकात्वीक्षणिकादैवज्ञाथरजस्वला ॥ स्त्रीधर्मिण्यविरात्रेयीमलिनीपुष्पवत्यपि ॥८४॥ ऋतुमत्यप्युदक्यापिस्याद्रजःपुष्पमार्त्तवं ॥ श्रद्धालुर्दोहदवतीनिष्कलाविगतार्त्तवा ॥८५॥ आपन्नसत्वास्याद्गुर्विण्यंतर्वत्नीचगर्भिणी ॥ गणिकादेस्तुगाणिक्यंगार्भिणंयौवतंगणे ॥८६॥ पुनर्भूर्दिधिषूरूढाद्विस्तस्यादिधिषुःपति ॥ सतुद्विजोग्रेदिधिषुःसैवयस्यकुटुंबिनी ॥८७॥ कानीनःकन्यकाजातःसुतोथसुभगासुतः ॥ सौभागिनेयःस्यात्पारस्त्रैणेयस्तुपरस्त्रियाः ॥८८॥ पैतृष्वसेयःस्यात्पैतृष्वस्रीयश्चपितृष्वसुः ॥ सुतौमातृष्वसुश्चैवंवैमात्रेयोविमातृजः ॥८९॥ अथबांधकिनेयःस्याद्बंधुलश्चासतीसुतः ॥ कौलटेयःकौलटेरोभिक्षुकीचसतीयदि ॥९०॥ तदाकौलटिनेयोस्याः

पंचअसतीपुत्रस्य २

भतेईसुतः २

मुग्धा ॥१३॥ कांतार्थिनी तु या याति संकेतं साभिसारिका ॥ पुंश्चली धर्षिणी बंधक्यसती कुलटेत्व-
री ॥१४॥ स्वैरिणी पांसुला च स्यादशिश्वी शिशुना विना ॥ अवीरा निष्पतिसुता विश्वस्ता-
विधवे समे ॥१५॥ आलिः सखी वयस्याथ पतिवत्नी सभर्तृका ॥ वृद्धा पलिक्नी प्राज्ञी तु प्रज्ञा प्रा-
ज्ञा तु धीमती ॥१६॥ शूद्री शूद्रस्य भार्या स्याच्छूद्रा तज्जातिरेव च ॥ आभीरी तु महाशूद्री जातिपुं-
योगयोः समाः ॥१७॥ आर्याणी स्वयमर्या स्यात्क्षत्रिया क्षत्रियाण्यपि ॥ उपाध्यायाप्युपाध्या-
यी स्यादाचार्यापि च स्वतः ॥१८॥ आचार्याणी तु पुंयोगे स्यादर्या क्षत्रियी तथा ॥ उपाध्यायान्यु-
पाध्यायी पोटा स्त्रीपुंसलक्षणा ॥१९॥ वीरपत्नी वीरभार्या वीरमाता तु वीरसूः ॥ जातापत्या प्र-
जाता च प्रसूता च प्रसूतिका ॥२०॥ स्त्री नग्निका कोटवी स्याद्दूती संचारिके समे ॥ कात्यायन्य-
र्धवृद्धा या काषायवसनाधवा ॥२१॥ सैरंध्री परवेश्मस्था स्ववशा शिल्पकारिका ॥ अ-

अशिशुरव्याः२ अपुत्रे वेलाः२ कन्याहिताससमाहेशा मदनेनमदेनअभिसारयेते कौसौ भवेदभिसारिका१ जीवंतभर्तृकायाः२ अपतिपत्रवत्याः२ वृद्धायाः२

अप्रसत्याः२ पतिमर्तृकायाः अधीतविद्यायाः४ आर्यादिजातिविशेषयोः५ स्वयंमंत्रव्याख्यात्र्याः स्त्रीपुंसलक्षणायाः२ प्रसूतायाः२

प्रशस्तबुद्धेः गोपालकायाः४ समंविद्योपदेशिनः५ वीरमातुः२ वी

क्षत्रियस्त्रीजाताः५ शूद्रभार्यायाः२ देदूताः

30

31

कुक्षिगतसत्वस्य २ प्रसूजनपितारौ २

भ्रातृभगिन्यौ प्रसवमासस्य २ मातरपितरौ च तातजनयित्रौ

३२ भ्रातृभगिन्यौ भ्रातरावुभौ ॥१॥ मातापितरौ पितरौ मातरपितरौ पितरौ श्वश्रूश्वशुरौ श्वशुरौ पुत्रौ

वीर्यसोणमिलितस्य २ पुत्रश्च दुहिता च ॥२॥ दंपती जंपती जायापती भार्यापती च तौ ॥ गर्भाशयो जरायुः स्यादुल्बं च जालीइतिख्यातायाः २

कललोऽस्त्रियां ॥३॥ सूतिमासो वैजननो गर्भो भ्रूण इमौ समौ ॥ तृतीयाप्रकृतिः शंढः क्लीवः

पंडो नपुंसकं ॥४॥ शिशुत्वं शैशवं बाल्यं तारुण्यं यौवनं समे ॥ स्यात्स्थाविरं तु वृद्धत्वं वृद्धसं

घोऽपि वार्द्धकं ॥५॥ पलितं जरसा शौक्ल्यं केशादौ विस्रसा जरा ॥ स्यादुत्तानशया डिंभा स्तनपा उतिवीनायाः ५

च स्तनंधयी ॥६॥ बालस्तु स्यान्माणवको वयस्थस्तरुणो युवा ॥ प्रवयाः स्थविरो वृद्धो जीनो

वृद्धस्य २ जीर्णो जरन्नपि ॥७॥ वर्षीयान्दशमी ज्यायान्पूर्वजस्त्वग्रियोऽग्रजः ॥ जघन्यजे स्युः कनिष्ठ

कनिष्ठकस्य २ जवीयोवरजानुजाः ॥८॥ अमांसो दुर्बलश्छातो बलवान्मांसलोंऽसलः ॥ तुंदिलस्तुंदिभस्तुं

दी च वृहत्कुक्षिः पिचिंडिलः ॥९॥ अवटीटोऽवनाटश्चावभ्रटो नतनासिके ॥ केशवः केशिकः ३२

वृहत्कुक्षेः १

शीशस्य २ जतिवृद्धस्य ३ जोष्ठभ्रातुः ३ बलिनः २ नामनासिकस्य १ प्रशस्तकेशस्य १

षोडशवर्षपर्यंतस्य ४ जेराधाः ५

प्रजावती भ्रातृजाया ४

स्वेनोढाजनितस्य २ स्ववर्णोढाजनितस्य २ कं पुत्रस्य १ पितुः २

कौलटेयोपि चात्मजः ॥ आत्मजस्तनयः सूनुः सुतः पुत्रः स्त्रियां त्वमी ॥८२॥ आहुर्दुहितरं सर्वे
पत्यं तोकं तयोः समे ॥ स्वजाते त्वौरसोरस्यौ [illegible] तातस्तु जनकः पिता ॥८३॥ जनयित्री प्रसू
र्माता जननी भगिनी स्वसा ॥ ननंदा तु स्वसा पत्युर्नप्त्री पौत्री सुतात्मजा ॥८४॥ भार्यास्तु भ्रातृवर्ग
स्य यातरः स्युः परस्परं ॥ मातुलानी तु मातुली पतिपत्न्योः प्रसूः श्वश्रूः ॥८५॥ श्वशुरस्तु पिता तयोः
पितुर्भ्राता पितृव्यः स्यात् ॥ मातुर्भ्राता तु मातुलः ॥८६॥ स्यालाः स्युर्भ्रातरः पत्न्याः स्वामिनो देवृ
देवरौ ॥ स्वस्रीयो भागिनेयः स्यात् जामाता दुहितुः पतिः ॥८७॥ पितामहः पितृपिता तत्पिता प्रपिताम
हः ॥ मातुर्मातामहाद्येवं सपिंडास्तु सनाभयः ॥८८॥ समानोदर्य्यसोदर्य्यसगर्भसहजाः समाः ॥ सगो
त्रबांधवज्ञातिबंधुस्वजनाः समाः ॥८९॥ ज्ञातेयं बंधुता तेषां क्रमाद्भावसमूहयोः ॥ धवः प्रियः प
तिर्भर्त्ता जारस्तूपपतिः समौ ॥९०॥ अमृते जारजः कुंडो मृते भर्त्तरि गोलकः ॥ भ्रात्रीयो भ्रातृजो

अंगनाः २

जितरागीदिशनीतिरव्याताया: ४

भगिनीपुत्रस्य ४

32

ग

सतः

भ्रातुःपुत्रस्य १

बंधुतासहः २ ज्ञातीनां भावः २

सप्तपुरुषावधिकज्ञातीनां २

साद्वातभ्रातुः २

इतः परं शुक्रावधेः पूर्वे शब्दास्त्रिलिंगा इत्यर्थः

पथरी इति ख्यातस्य ४

खाजु इति शुक्रस्य २ फोडा इति ख्यातस्य २ समानार्थाः समा इत्येकार्था ज्ञातव्याः

ममेसा ख्यातस्य २ मूत्रपुरीषनिरोधस्य २ सदागलित नाडीव्रणस्य २

कंडूः खर्जूश्च कंडूया विस्फोटः पिटकः स्त्रिषु ॥१९॥ व्रणोऽस्त्रियामीर्ममरुः क्लीबे नाडीव्रणः पुमान्
॥ कोठो मंडलकं कुष्ठश्वित्रे दुर्नामकार्शसी ॥२०॥ अनाहस्तु विबंधः स्याद्ग्रहणी रु
क्प्रवाहिका ॥ प्रच्छर्दिका वमिश्च स्त्री पुमांस्तु वमथुः समाः ॥२१॥ व्याधिभेदा विद्रधिः स्त्री ज्व
रमेहभगंदराः ॥ अश्मरी मूत्रकृच्छ्रं स्यात्पूर्वे शुक्रावधेस्त्रिषु ॥२२॥ रोगहार्यगदंकारो भिषग्वैद्यौ
चिकित्सके ॥ वार्तो निरामयः कल्य उल्लाघो निर्गतो गदात् ॥२३॥ ग्लानग्लास्नू आमयावी
विकृतो व्याधितोऽपटुः ॥ आतुरोऽभ्यमितोऽभ्यांतः समौ पामनकच्छुरौ ॥२४॥ दद्रुणो दद्रुरोगी स्यादर्
शोरोगयुतोऽर्शसः ॥ वातकी वातरोगी स्यात् सातिसारोऽतिसारकी ॥२५॥ स्युः क्लिन्नाक्षे चुल्ल
चिल्लपिल्लाः क्लिन्नेऽक्ष्णि चाप्यमी ॥ उन्मत्त उन्मादवति श्लेष्मलः श्लेष्मणः कफी ॥२६॥
न्युब्जो भुग्ने रुजा वृद्धनाभौ तुंदिलतुंदिभौ ॥ किलासी सिध्मलोऽन्धोऽदृङ् मूर्च्छाले मूर्तमूर्च्छितौ

(margin:) श्लीपदं पादवल्मीकं केशघ्नस्त्विन्द्रलुप्तकः ॥

(marginal glosses, left:) ...कौ २२ रक्तकुष्ठस्य २ — वांतरोगस्य २ — वैद्यस्य ५ — रोगिणः ४ — ...कः २

(marginal glosses, right:) संग्रहणीरोगस्य २ — १ — रोगात्तीर्णदेहस्य ५ — दद्रुयुक्तस्य ४ — अतीसारयुक्तस्य २ — श्लेष्मयुक्तस्य २ — ३३

(glosses, bottom:) रोगेन वृद्धनाभेः २ — उन्नतनाभेः १ — सिध्मयुक्तस्य २ — अंधस्य २ — नेत्ररोगयुक्तस्य ३ — वातरोगिणः २ रोगिणः ५ — उन्मत्तस्य २ — श्वित्ररोगयुक्तस्य ५ — पामरोगयुक्तस्य ४